विश्रान्तप्राचार्यः, महाराज कालेज्,
मैसूरु – ५

# सन्देशः



कर्णाटकसर्वकारेण संस्कृतभाषायाः विशेषाध्ययन–संशोधनादिनिमित्तम् एव संस्कृतविश्वविद्यालयः संस्थापितः इति तु आदर्शविषयः । सम्प्रति अयं विश्वविद्यालयः त्रैमासिकसंस्कृतवार्तापत्रं प्रकाशयति इति विषयं श्रुत्वा मे महान् प्रमोदः समजनि । संस्कृतभाषया अपरिमितज्ञानप्रदानेन मानवकुलं प्रति महत् योगदानं कृतं वर्तते इति बहवः भारतीयाः पूर्णतः न जानन्ति । एषु वर्षेषु एतद्विषये जनेषु जागरणं जायमानम् अस्ति यत् महतः अभिमानस्य विषयः अस्ति । कर्णाटकसंस्कृतविश्वविद्यालयेन इतरसंस्कृतसेवासंस्थाभिः च ये संस्कृतकार्यक्रमाः चाल्यन्ते, तेषां कार्यक्रमाणां मुखवाणीरूपं भवतु इदं त्रैमासिकवार्तापत्रम् । राज्ये प्रचलिष्यमाणान् संस्कृतकार्यक्रमान् न केवलं कर्णाटकराज्यीयाः, अपि तु इतरराज्यीयाः अपि जानन्तु । प्रभुः श्रीरामचन्द्रः इमां सारस्वतसेवाम् अनुगृह्णातु इति प्रार्थये ।

केरलापुरम्(अरकलगूडु – ता) सि.जि. पुरुषोत्तमः
हासन जिल्ला

राष्ट्रपतिप्रशस्तिपुरस्कृतः दर्शनरत्नं मीमांसाभूषणम्
दूरवाणी – ०८०– २६६४८२१५
प्रो. कृष्णमाचार्य तमणाचार्य पाण्डुरङ्गि
बेङ्गलूरुविश्वविद्यानिलयस्य निवृत्तसंस्कृतप्राध्यापकः
पूर्णप्रज्ञविद्यापीठस्य उपकुलपतिः

विद्याधीशनिलयः
No. 132/4, III Block
जयनगरम्, बेङ्गलूरु – ५६००११
दूरवाणी – ०८०– २६६४८२१५